


# नवनाग स्तोत्र

## नाग स्तुति

एतैत सर्पा: शिवकण्ठभूषा।
लोकोपकाराय भुवं वहन्तः॥
भूतैः समेता मणिभूषिताङ्गाः।
गृह्णीत पूजां परमं नमो वः॥
कल्याणरुपं फणिराजमग्र्यं।
नानाफणामण्डलराजमानम्॥
भक्त्यैकगम्यं जनताशरण्यं।
यजाम्यहं नः स्वकुलाभिवृद्ध्यै॥

हिंदीपथ.कॉम – HindiPath.com

# नवनाग स्तोत्र पाठ

अनन्तं वासुकिं शेषं पद्मनाभं च कम्बलं
शन्खपालं धृतराष्ट्रं च तक्षकं कालियं तथा
एतानि नव नामानि नागानाम च महात्मनं।
सायमकाले पठेन्नीत्यं प्रातक्काले विशेषतः
तस्य विषभयं नास्ति सर्वत्र विजयी भवेत॥
॥ इति श्री नवनागस्त्रोत्रं ॥

# अथ नाग गायत्री मन्त्र

ॐ नव कुलाय विद्महे विषदन्ताय धीमहि तन्नो सर्प प्रचोदयात्॥

# वैदिक मन्त्र

ॐ नमोस्तु सर्पेभ्योयेकेचपृथिवीमनु येऽअन्तरिक्षेयेदिवितेब्भ्य: सर्पेब्भ्योनम: ।
याऽइषवोयातुधानानांय्येवाव्वनस्प्पतिँरनु ।
येवावटेषुशेरतेतेब्भ्य: सर्पेब्भ्योनम: ।
येवा मीरोचनेदिवोयेवासूर्य्यस्यरश्मिषु ।
येषामप्पसुसदस्कृतन्तेब्भ्य: सर्पेब्भ्योनम: ॥

हिंदीपथ.कॉम – HindiPath.com

## ग्रह प्रत्याधिदेवता

अनन्त भास्करं विद्यात् सोमं विद्यात् तु वासुकिम् ।
लोहितं तक्षकं विद्यात् बुधं कर्कोटकं स्मृतम् ॥
विद्यात् वृहस्पति पद्मं महापद्मं च भार्गवम् ।
शङ्खपालशतिं विद्यात् राहु कम्बलकं तथा ।
केतुश्च कालीयं विद्यात् इति प्रत्याधि देवता ॥

## ध्यान

अनन्तपद्म पत्राद्यं फणाननेकतो ज्वलम्।
दिव्याम्बर धरं देवं रत्न कुण्डलमण्डितम् ॥१॥
नानारत्नपरिक्षिप्तं मुकुटं द्युतिरञ्जितम्।
फणामणिसहश्रोद्यैरसंख्यै पन्नगोत्तमे ॥२॥
नाना कन्यासहस्त्रेण समन्तात् परिवारितम्।
दिव्याभरण दीप्ताङ्गं दिव्यचन्दन चर्चितम् ॥३॥
कालाग्निमिव दुर्धर्षं तेजसादित्य सन्निभम्।
ब्रह्माण्डाधारभूतं त्वां यमुनातीरवासिनम् ॥४॥
भजेऽहं दोषशान्त्यैत्र पूजये कार्यसाधकम्।
आगच्छ कालसर्पाख्यदोषं मम निवारय ॥५॥

हिंदीपथ.कॉम – HindiPath.com

## कालसर्प अभिषेक मन्त्र

यो सौ ब्रजधरो देवः आदित्यानां प्रभुर्मतः।
सहस्त्रनयनः शक्रो राहुपीड़ा व्यपोहतु ॥१॥
मुखं य सर्व देवानां सप्तार्चि रमितद्युतिः।
कालसर्प कृतो दोष तस्य पीड़ां व्यपोहतु ॥२॥
यः कर्मसाक्षी लोकानां धर्मो महिष वाहनः।
राहुकाल कृतां पीड़ा सर्व पीड़ा व्यपोहतु ॥३॥
रक्षोगणाधिपः साक्षान्नीलाञ्जन समप्रभः।
खड्गहस्तोति भीमश्च ग्रहपीड़ा व्यपोहतु ॥४॥
नागपाशधरोदेवः सदा मकरवाहनः।
सजलाधिपतिर्देवो राहुपीड़ा व्यपोहतु ॥५॥
प्राणरुपोहि लोकानां सदाकृष्ण मृगप्रियः।
कालसर्पोद्भवां पीड़ा ग्रहपीड़ा व्यपोहतु ॥६॥
यो सौ निधिपतिर्देवः खड्गशूल गदाधरः।
कालसर्पस्य कलुषं सर्वदोष व्यपोहतु ॥७॥
यो साविन्दुधरो देवः पिनाकी वृषवाहनः।
राहु केतु कृतं दोष स नाशयतु शंकरः ॥८॥

## जल विसर्जन

कालीयो नाम नागोऽसौ कृष्णस्य पाद पांशुना।
रक्षा तार्क्षेण सम्प्राप्तः सोऽभयं हि ददातु नः ॥१॥
कालीयो नाम नागोऽसौ विषरुपो भयंकरः।
नारायणेन संपृष्टो सदा सं विधधातु नः ॥२॥
कालीयो नाम नागोऽयं ज्ञातो सर्वे महाबली।

अभयं प्राप्त कृष्णेन निर्भयो विचरत्यहि ॥३॥
सो कालीय स्वदोषाच्च निर्भयं कुरु मां सदा।
अनेन पूजनेनाथ प्रीतो सुखकरो भवेत् ॥४॥
बलिं प्राप्य स्वकीयां हि आशिषं मे प्रयच्छतु।
कालसर्पस्य दोषोऽयं शान्तो भवतु सर्वदा ॥५॥
तृप्तो नागः प्रयच्छं मे धनधान्यादि सम्पदः।
जले विहर त्वं नाग मां हि शान्तिप्रदो भव ॥६॥

## नाग आवाहन

### अनन्त नाग – मध्य दिशा

अनन्तं विप्रवर्गं च रक्त कुंकुम वर्णकम्।
सहस्त्र फण संयुक्तं तं देवं प्रणमाम्यहम् ॥१॥

### शेष नाग – पूर्व दिशा

विप्रवर्गं श्वेतवर्णं सहस्त्रफणसंयुतम्।
आवाहयाम्यहं देवं शेष वै विश्वरुपिणम् ॥२॥

### वासुकी नाग – आग्नेय दिशा

क्षत्रिय पीतवर्णं च फणैर्सप्तशतैर्युतम्।
युक्तमतुंगकायं च वासुकी प्रणमाम्यहम् ॥३॥

हिंदीपथ.कॉम – HindiPath.com

## तक्षक नाग – दक्षिण दिशा

वैश्यवर्गं नीलवर्णं फणैः पंचशतैर्युतम्।
युक्तमुतुंग्कायं च तक्षकं प्रणमाम्यहम् ॥४॥

## कर्कोटक नाग – नैऋत्य दिशा

शूद्रवर्गं श्वेतवर्णं शतत्रयफणैर्युतम्।
युक्तमुत्तुंगकायं च कर्कोटं च नमाम्यहम् ॥५॥

## शंखपाल नाग – पश्चिम दिशा

शंखपालं क्षत्रीयं च पत्र सप्तशतैः फणैः।
युक्तमुत्तुंग कायं च शिरसा प्रणमाम्यहम् ॥६॥

## नील नाग – वायव्य दिशा

वैश्यवर्गं नीलवर्णं फणैः पंचशतैर्युतम्।
युक्तमत्तुंगकायं च तं नीलं प्रणमाम्यहम् ॥७॥

## कम्बलक नाग – उत्तर दिशा

कम्बलं शूद्रवर्णं च शतत्रयफणैर्युतम् ।
आवाहयामि नागेशं प्रणमामि पुनः पुनः ॥८॥

हिंदीपथ.कॉम – HindiPath.com

## महापद्म नाग – ईशान दिशा

वैश्यवर्गं नीलवर्णं पत्रं पंच शतैर्युतम्।
युक्तमत्तुंग कायं च महापद्मं नमाम्यहम् ॥९॥

हिन्दीपथ.कॉम